# २१. पादुका सहस्रम् - बिम्ब प्रतिबिम्ब पद्धतिः (२०)

शौरेः शुद्धान्त नारीणां विहार मणि दर्पणम् ।
प्रसत्तेरिव संस्थानं पदत्राण मुपास्महे ॥ २१.१॥ ७११॥

कमलापति पादुके कदाचित्
विहगेन्द्रस्त्वयि बिम्बितो बिभाति ।
सविलास गतेऽपि रङ्गभर्तुः
निजमात्मान मिवोपधातु कामः ॥ २१.२॥ ७१२॥

मणि पङ्क्तिषु ते दिशा मधीशाः
प्रतिबिम्बानि निजानि वीक्षमाणाः ।
अभियन्ति मुकुन्द पादुके त्वां
अधिकारान्तर सृष्टि शङ्कयेव ॥ २१.३॥ ७१३॥

मणिमौलि शतेन बिम्बितेन
प्रणतानां परितः सुरासुराणाम् ।
मुरभिन् मणिपादुके महिम्ना
युगपत् तेषु समर्पितेव भासि ॥ २१.४॥ ७१४॥

उपनीत मुपायनं सुरेन्द्रैः
प्रतिबिम्बच्छलतस्त्वयि प्रविष्टम् ।

स्वयमेव किल प्रसाद भूम्ना
 प्रतिगृह्णासि मुकुन्द पादुके त्वम् ॥ २१.५॥ ७१५॥

रङ्गेश्वरस्य नव पल्लव लोभनीयौ
 पादौ कथन्नु कठिना स्वय मुद्वहेयम् ।
इत्याकलय्य नियतं मणिपादुके त्वं
 पद्मास्तरं वहसि तत्प्रतिबिम्ब लक्षात् ॥ २१.६॥ ७१६॥

पादार्पणात् प्रथमतो हरिदश्मरम्ये
 मध्ये तव प्रतिफलन् मणिपादरक्षे ।
मन्ये निदर्शयति रङ्गपति र्युगान्ते
 न्यग्रोधपत्र शयितं निजमेव रूपम् ॥ २१.७॥ ७१७॥

यात्रावसान मधिगच्छति रङ्गनाथे
 विश्राणय स्यनुपदं मणिपादुके त्वम् ।
प्रायः प्रयाण समये प्रतिबिम्बितानां
 तीर्थावगाह मपरं त्रिदशेश्वराणाम् ॥ २१.८॥ ७१८॥

उच्चावचेषु तव रत्नगणेषु मातः
 वेधाः प्रयाण समये प्रतिबिम्बिताङ्गः ।
आशङ्कते मुरभिदो मणिपादुके त्वां
 आगामि कल्प कमलासन पङ्क्ति गर्भाम् ॥ २१.९॥ ७१९॥

आलोक रश्मि नियतां मणिपादुके त्वां
        आरुह्य सञ्चरति रङ्गपतौ सलीलम् ।
अन्तः पुरेषु युगपत्सुदृशो भजन्ते
        डोलाधिरोहण रसं त्वयि बिम्बिताङ्ग्यः ॥ २१.१०॥ ७२०॥

कालेषु राघव पदावनि भक्ति नम्रः
        कार्याणि देवि भरतो विनिवेदयंस्ते ।
त्वद्रत्न बिम्बत तयाऽपि मुहुः स्वकीयां
        राजासन स्थिति मवेक्ष्य भृशं ललज्जे ॥ २१.११॥ ७२१॥

प्रत्यागते विजयिनि प्रथमे रघूणां
        विन्यस्यति त्वयि पदं मणिपादरक्षे ।
रत्नौघ बिम्बित निशाचर वानरां त्वां
        पूर्वक्षणस्थ मिव पुष्पक मन्वपश्यन् ॥ २१.१२॥ ७२२॥

वैयाकुलीं शमयितुं जगतो वहन्त्या
        रक्षाधुरां रघु धुरन्धर पादरक्षे ।
प्राज्यं यशः प्रचुर चामर बिम्ब लक्षात्
        प्रायस्त्वया कबलितं प्रतिभूपतीनाम् ॥ २१.१३॥ ७२३॥

प्रतिदिश मुपयाते देवि यात्रोत्सवार्थं

त्वयि विहरण काले बिम्बिते जीवलोके ।
वहसि मणिगणैस्त्वं पादुके रङ्गभर्तुः
कबलित सकलार्थां काञ्चि दन्या मवस्थाम् ॥ २१.१४॥ ७२४॥

भगवति गरुडस्थे वाहनस्थाः सुरेन्द्राः
त्वयि विनिहित पादे भूमिमे वाश्रयन्ति ।
तदपि चरणरक्षे रत्नजाले त्वदीये
प्रतिफलित निजाङ्गा स्तुल्यवाहा भवन्ति ॥ २१.१५॥ ७२५॥

स्वच्छाकारां सुर युवतयः स्वप्रतिच्छन्द लक्षात्
गाहन्ते त्वां प्रणति समये पादुके साभिमानाः ।
स्त्रीरत्नानां परिभव विधौ सृष्टिमात्रेण दक्षां
नीचैः कर्तुं नरसखमुने रुर्वशी मूरुजाताम् ॥ २१.१६॥ ७२६॥

स्वेच्छाकेलि प्रियसहचरीं स्वच्छ रत्नाभिरामां
स्थाने स्थाने निहित चरणो निर्विशन् रङ्गनाथः ।
सञ्चारान्ते सह कमलया शेष शय्याधिरूढः
त्यक्त्वाऽपि त्वां त्यजति न पुनः स्वप्रतिच्छन्दलक्षात्॥२१.१७॥७२७॥

त्वामेवैका मधिगतवतः केलि सञ्चारकाले
पार्श्वे स्थित्वा विनिहित दृशोः पादुकेऽनन्य लक्ष्यम् ।
त्वद्रत्नेषु प्रतिफलितयो र्नित्य लक्ष्य प्रसादा

पद्माभूम्यो र्दिशति भवती पादसेवां मुरारेः ॥ २१.१८॥ ७२८॥

एकामेकः किल निरविशत्पादुके द्वारकायां
क्रीडायोगी कृत बहुतनुः षोडशस्त्री सहस्रे ।
शुद्धे देवि त्वदुपनिहिते बिम्बितो रत्नजाले
भुङ्क्ते नित्यं स खलु भवतीं भूमिकानां सहस्रैः ॥ २१.१९॥ ७२९॥

हरिपदनखेषु भवती प्रतिफलति तवैत दपि रत्नेषु ।
उचिता मिथः पदावनि बिम्ब प्रतिबिम्बता युवयोः ॥ २१.२०॥ ७३०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
बिम्ब प्रतिबिम्ब पद्धति रेकविंशी ॥